1

गोपालसहस्रनाम॰
॥ ॥प्रारम्भः॥ ॥
पत्र

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

श्रीगणेशायनमः॥ कैलासशिखरे रम्ये गौरी पप्रच्छ शंकर
म् ॥ ब्रह्माण्डाखिलनाथस्त्वं सृष्टिसंहारकारकः॥
त्वंपूज्यसेलोके ब्रह्मविष्णुसुरादिभिः ॥ नित्यंपठसिदेवेश कस्य
स्तोत्रंमहेश्वर ॥ २ ॥ आश्चर्यमिदमाख्यातं जायते मयि शंकर
१ तत्प्राणेशमहाप्राज्ञ संशयं छिन्धि शंकर ॥ ३ ॥ श्रीमहादेव उ १
वाच ॥ धन्यासि कृतपुण्यासि पार्वति प्राणवल्लभे रहस्या
तिरहस्यं च यत्पृच्छसि वरानने ॥ ४ ॥ स्त्रीस्वभावान्महादेवि
पुनस्त्वं परिपृच्छसि गोपनीयं गोपनीयं गोपनीयं प्रयत्न
तः ॥ ५ ॥ दत्ते च सिद्धिहानिः स्यात् तस्माद्यत्नेन गोपयेत् ॥ इदं रह

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रूपकलायुतः॥१२॥ श्रीकृष्णचन्द्रो भगवान्नन्दगोपवरोद्यतः॥ व्यापिनो
रूपिणी मानायशोदानन्ददायिनी॥१३॥ ताभ्यां प्रयाचितौ देवभावबु
देवतः॥ अस्ते रणाभ्यार्थितो देवो देवैरपि सुरेश्वरि॥१४॥ जातोऽवन्यां मुकु
न्दोऽपि मुरलीवेदरेचिका॥ तयासार्द्धं वचः कृत्वा ततो जातो महीतले
॥१५॥ संसारसारसर्वस्वं श्यामलं महदुज्वलम्॥ एतज्ज्योतिरहं वन्द्यं
चिन्तयामि सनातनम्॥१६॥ गौरतेजो विना यस्तु श्यामं तेजस्स
मर्चयेत्॥ जपेद्वा ध्यायते वापि स भवेत्पातकी शिवे॥१७॥ स ब्रह्म
हा सुरापी च स्वर्णस्तेयी च पंचमः॥ एतैर्दोषैर्विलिप्येत तेजोभेदा
न्महेश्वरि॥१८॥ तस्माज्ज्योतिरभूद्द्वेधा राधामाधवरूपकम्॥ तस्मा
दिदं महादेवि गोपालेनैव भाषितम्॥१९॥ दुर्वाससो मुनेर्मोहे का

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्मपरमं पुरुषार्थप्रदायकम् ॥ ६ ॥ धनरत्नौघमाणिक्यतुरंग
मगजादिकम् ॥ ददाति स्मरणादेव महामोक्षप्रदायकम् ॥ ७ ॥ न
तोऽहं संप्रवक्ष्यामि शृणुष्वावहिता प्रिये ॥ योऽसौ निरंजनो देवो
विश्वरूपी जनार्दनः ॥ ८ ॥ संसारसागरोत्तीर्णो कारणाय नृणां स
दा ॥ श्रीरंगादिस्वरूपेण त्रैलोक्यं व्याप्य तिष्ठति ॥ ९ ॥ ततो लोका
महामूढा विष्णुभक्तिविवर्जिताः ॥ निश्चयं नाधिगच्छन्ति
पुनर्नारायणो हरिः ॥ १० ॥ निरंजनो निराकारो भक्तानां प्रीतिका
रकः ॥ वृन्दावनविहाराय गोपालंरूपमुद्धिरन् ॥ ११ ॥ मुरलीवाद
नाधारी राधायै प्रीतिमावहन् ॥ अंशांशेभ्यः समुन्मील्य पूर्णा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

गोपाल०
सहस्र०

पादयोः॥ चन्द्रकीलकाय नमः सर्वसन्धिषु॥ इति ऋष्यादिन्यासः॥
अथ मंत्रः ॐ भगवते नन्दपुत्राय॥ आनन्दवपुषे गोपीजनवल्ल
भाय स्वाहा॥ अथ मंत्र करन्यासाङ्गन्यासौ॥ नमोऽङ्गुष्ठाभ्यां नमः॥
भगवते तर्जनीभ्यां नमः॥ नन्दपुत्राय मध्यमाभ्यां नमः॥ आनन्दवपुषे
ऽनामिकाभ्यां नमः॥ गोपीजनवल्लभाय कनिष्ठिकाभ्यां नमः॥ स्वाहा
॥२॥ करतलकरपृष्ठाभ्यां नमः॥ ॐ नमो हृदयाय नमः॥ भगवते शिरसे
स्वाहा॥ नन्दपुत्राय शिखायै वषट्॥ आनन्दवपुषे कवचाय हुम्॥ गो ॥३॥
पीजनवल्लभाय नेत्रत्रयाय वौषट् स्वाहा॥ अस्त्राय फट्॥ अथ ध्या
नम्॥ फुल्लेन्दीवरकान्तिमिन्दुवदनं बर्हावतंसप्रियम्॥ श्रीवत्सा
ङ्कमुदारकौस्तुभधरं पीताम्बरं सुन्दरं गोपीनां नयनोत्पलार्चि
ततनुं गोगोपसंघावृतं॥ गोविन्दं कलवेणुवादनपरं दिव्याङ्गभूषं
भजे॥ २५॥ श्रीगोपालो महीपालः सर्ववेदाङ्गपारगः॥ कृष्णः कम

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

र्त्रिकांतसमग्रके ॥ ततः पप्रच्छ वतीराधा संदेहं भेदमात्मनः ॥ २० ॥ निर
ञ्जेनात्समुत्पन्नं मयाधीनं जगन्मपि ॥ श्रीकृष्णेन ततः प्रोक्तं राधा
ये नारदाय च ॥ २१ ॥ ततो नारदतस्सर्वे विरलावैष्णवास्तथा ॥ कलौ
जानन्ति देवेशि गोपनीयं प्रयत्नतः ॥ २२ ॥ शठाय कृपणायाथ दां
श्री भिकाय सुरेश्वरि ॥ ब्रह्महत्यामवाप्नोति तस्माद्यत्नेन गोपये
त् ॥ २३ ॥ ॐ अस्य श्रीगोपालसहस्रनाममंत्रस्य नारदऋषिरनुष्टुप्
छन्दः ॥ श्रीगोपालो देवता कामो बीजं मायाशक्तिश्चन्द्रः कीलकं
मम अभीष्टसंसिद्ध्यर्थे श्रीगोपालसहस्रनामपाठे विनियोगः
ॐ नारदऋषये नमः शिरसि ॥ अनुष्टुप्छन्दसे नमो मुखे ॥ श्रीगोपा
लो देवताये नमो हृदि ॥ कामो बीजाय नमो गुह्ये ॥ मायाशक्तये नमः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कोकिलस्वरभूषणः ३४ रामो नीलाम्बरो देवो हली ऽदुर्दममर्द्दनः सहस्रा
क्षपुरीभेत्ता महामारीविनाशनः ३५ शिवः शिवतमो भेत्ता बलारा
तिप्रपूजकः कुमारीवरदायी च वरेण्यो मीनकेतनः ३६ नरो नारा
यणो धीरो धीरापतिरुदारधीः श्रीपतिः श्रीनिधिः श्रीमान् माप
तिः प्रतिराजहा ३७ वृन्दापतिः कुलग्रामी धाम ब्रह्मसनातनः ॥ रे
वतीरमणो रामः प्रियश्चञ्चललोचनः ३८ रामायणशरीरोऽयं रमारा
मः श्रियःपतिः शर्वरः शर्वरी शर्वः सर्वत्रसुखदायकः ३९ राधारा
धितो राधी राधाचित्तप्रमोदकः राधापतिः सुखोपेतो राधामोहन
तत्परः ४० राधावशीकरो राधाहृदयाम्भोजषट्पदः राधालिंगनसं
मोदो राधानर्त्तनकौतुकः ४१ राधासंजातसंप्रीतो राधाकामफ
लप्रदः वृन्दापतिः कोशनिधिः कोकशोकविनाशनः ४२ ॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

लपत्राक्षः पुण्डरीकः सनातनः ॥ २६ गोपतिर्भूपतिः शास्ता प्रहर्त्ता विश्व
तोमुखः ॥ आदिकर्त्ता महाकर्त्ता महाकालः प्रतापवान् ॥ २७ जगज्जीवो
जगद्धाता जगद्भर्त्ता जगद्वसुः ॥ मत्स्यो भीमः कुहूभर्त्ता हर्त्ता वाराहमूर्त्ति
मान् ॥ २८ ॥ नारायणो हृषीकेशो गोविन्दो गरुडध्वजः ॥ गोकुलेन्द्रो महा
चन्द्रः शर्वरीप्रियदायकः ॥ २९ कमलामुखलोलाक्षः पुण्डरीकशु
भावहः ॥ दुर्वासाः कपिलो भौमः सिन्धुः सागरसंगमः ॥ ३० ॥ गोवि
न्दो गोपतिर्गोत्रं कालिन्दीप्रेमपूरकः ॥ गोस्वामी गोकुलेन्द्रश्च गो
वर्द्धनवरप्रदः ॥ ३१ नन्दादिगोकुलत्राता दाता दारिद्र्यभञ्जनः ॥ स
मे॰ र्वमंगलदाता च सर्वकामप्रदायकः ॥ ३२ आदिकर्त्ता महीभर्त्ता सर्व
नागरासिन्धुजः ॥ गजगामी गजोद्धारी कामी कामकलानिधिः ॥ ३३ ॥
कलंकरहितश्चन्द्रो विश्वास्यो विश्वसनमः ॥ मालाकारः कृपाकारः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

गोपालसह
स्रनाम
वृहत्

द्वारकावासतत्त्वज्ञो हुताशनवरप्रदः यमुनावेगसंहारी नीलाम्बरधरप्रभुः
॥५०॥ विभुश्शरासनो धन्वी गणेशो गणनायकः लक्ष्मणो लक्षणो ल
क्षो रक्षो वंशविनाशनः ५१ वामनो वामनीभूतो वामनो वामनारुहः
यशोदानन्दकर्त्ता च यमलार्ज्जुनमुक्तिदः ५२ उलूखली महामानो दामब
द्धाह्वयी शमी भक्तानुकारी भगवान् केशवो चलधारकः ५३ केशिहा
५ मधुहा मोही वृषासुरविघातकः अघासुरविनाशी च पूतनामोक्षदाय
कः कुब्जाविनोदी भगवान् कंसमृत्युर्महामखी अश्वमेधो वाजपे ५
यो गोमेधो नरमेधवान् ५५ कन्दर्प्पकोटिलावण्यश्चन्द्रकोटिसुशी
5
तलः रविकोटिप्रतीकाशो वायुकोटिमहाबलः ५६ ब्रह्मा ब्रह्माण्डकर्त्ता
च कमलावाञ्छितप्रदः कमली कमलाक्षश्च कमलामुखलोलुपः
५७ कमलाव्रतधारी च कमलाभः पुरन्दरः सौभाग्याधिकचित्तो यः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

चेन्द्रापतिः चन्द्रपतिः श्चराड्को दण्डभञ्जकः ॥ रामो दाशरथी रामो भृ
गुवंशसमुद्भवः ॥ ८३ आत्मारामो जितक्रोधो मोहो मोहान्धभञ्ज
नः ॥ वृषभानुर्भवो भावी काश्यपिः करुणानिधिः ॥ ८४ कोलाहलो
हली हालो हली हलधरप्रियः ॥ राधामुखाब्जमार्तण्डो भास्करो
८६ रविजो विधुः ॥ ८५ विधिर्विधाता वरुणो वारुणो वारुणीप्रियः ॥ रोहि
णीहृदयानन्दो वसुदेवात्मजो बली ॥ ८६ नीलाम्बरो रौहिणेयो
जरासंधवधोऽमलः ॥ नागो जवाम्भो विमुखो वीरहा वरदो बली
८७ गोपथो विजयी विद्वान् शिपिविष्टः सनातनः ॥ परशुरामव
चोग्राही वरग्राही शृगालहा ॥ ८८ दमघोषोपदेष्टा च रथग्रा
ही सुदर्शनिः ॥ वीरपत्नीयशस्त्राता जराव्याधिविघातकः ॥ ८९

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

दत्तवरो मुनिः ऋषभः पर्वतो ग्रामो नदीपवनवल्लभः ६७ पद्मनाभः
सुरश्रेष्ठो ब्रह्मा रुद्रो ऽहिभूषितः गणानांत्राणकर्त्ता च गणेशो ग्रहि
लो महीं ६८ गणाश्रयो गणाध्यक्षो क्रीडाकृतजगत्त्रयः यादवेन्द्रो
द्वारकेन्द्रो मथुरावल्लभो धुरी ६९ भ्रमरः कुन्तली कुन्तीसुतरक्षी
महामखी यमुनावरदाता च कश्यपस्य वरप्रदः ७० शंखचू
॥६॥ डवधो द्यामी गोपीरक्षणतत्परः पांचजन्यकरो रामी त्रिरामी वन ॥६॥
जो जयः ७१ फाल्गुनः फाल्गुनसखा विराधवधकारकः रु
क्मिणीप्राणनाथश्च सत्यभामाप्रियंकरः ७२ कल्पवृक्षो म
हावृक्षो दानवृक्षो महाफलः अंकुशो भूसुरो भावो भामको भ्राम
को हरिः ७३ सरलः शाश्वतो वीरो यदुवंशी शिवात्मकः प्रद्युम्नो बल
कर्त्ता च प्रहर्त्ता दैत्यहा प्रभुः ७४ महाधनो महावीरो वनमालाविभूषणः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

महामायी महोत्कटः ॥ प[illegible]नारकारिः सुरत्राता मारीचक्षोभकारकः ॥ वि
श्वामित्रप्रियो दान्तो रामो राजीवलोचनः ॥ लंकाधिपकुलध्वंसी विभीषणा
वरप्रदः ॥ सीतानन्दकरो रामो वीरो वारिधिबंधनः ९० चन्द्रा बलीपतिः
कूलः केशी कंशवधोऽमलः ॥ माधवो मधुहा माधी माधीको माधवी विभुः
९१ मुञ्जाटवीगाहमानो धेनुकारि धरात्मजः ॥ वंशीवटविहारी च
गोवर्द्धनवनाश्रयः ९२ तथा तालवनोद्देशी भाण्डीरवनशंख
हा ॥ तृणावर्त्तकृपाकारी वृषभानुसुतापतिः ॥ ९३ ॥ राधाप्राणसमो
राधावदनाब्जमधूकरः ॥ गोपीरञ्जनदैवज्ञो लीलाकमलपूजितः ९४
क्रीडाकमलसंदोहो गोपिकाप्रीतिरञ्जनः ॥ रञ्जको रञ्जनो रंगो रंगीरं
गमहीरुहः ९५ कामः कामारिभक्तोऽयं पुराणपुरुषः कविः ॥ नार
दो देवलो भीमो बालो बालमुखाम्बुजः ॥ अम्बुजो ब्रह्मसाक्षी च योगि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

भाग्यप्रदो वीरो रजकक्षयकारकः । कोमलो वारुणो राजा जलजो जलधा
रकः ८४ हारकः सर्वपापघ्नः परमेष्ठी पितामहः खड्गधारी कृपाकारी
राधारमणसुन्दरः ८५ द्वादशारण्यसंभोगी शेषनागफणालयः
कामः श्यामः सुखश्रीदः श्रीहः श्रीदः पतिः कृतिः ८६ हरिर्हरो
नरो नारो नरोत्तम इषुप्रियः गोपाली चित्तहर्ता च कर्ता संसारता
रकः ८७ आदिदेवो महादेवो गौरीगुरुरनाश्रयः साधुर्मधु
विधुर्धाता त्राता क्रूरपरायणः ८८ रोलम्बी च हयग्रीवो वानरारि
र्वनाश्रयः वनं वनी वनाध्यक्षो महावन्द्यो महामुनिः ८९ स्यमन्
तकमणिप्राज्ञो विज्ञो विघ्नविघातकः गोवर्द्धनो वर्द्धनीयो वर्द्धनी
वर्द्धनप्रियः ९० वार्द्धन्यो वर्द्धनो वर्द्धी वार्द्धिन्यस्सुमुखप्रियः वर्द्धि
तो वृद्धको वृद्धो वृन्दारकजनप्रियः ९१ गोपालरमणीभर्ता साम्ब

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नुसखीदामसौभाग्योजालंधरविनाशनः ७५ सूरःसूर्योमृकण्डश्चभा
स्करोविश्वपूजितः रविस्तमोहावह्निश्चवाडवोवडवानलः ७६ दैत्य
दर्पविनाशीचगरुडोगरुडाग्रजः गोपीनाथोमहानाथो ८० न्दाना
थोविरोधकः ७७ प्रपञ्चीपञ्चरूपश्चलतागुल्मश्चगोपतिः गंगा
चयमुनारूपोगोदावेत्रवतीतथा॥ कावेरीनर्मदातापीगण्डकीसरयूर
जः राजसस्तामसस्सात्त्विकसर्वांगीसर्वलोचनः ७८ सुदामयोऽमृतमयो
योगिनीवल्लभःशिवः बुद्धोबुद्धिमतांश्रेष्ठोविष्णुर्जिष्णुश्शचीपतिः
८० वंशीवंशधरोलोकोविलोकोमोहनाशनः रवरावोरवोरावोबलो
बालोबलाहकः ८१ शिवोरुद्रोनलोनीलोलांगूलीलांगूलाश्रयः
पारदःपवनोहंसोहंसारूढोजगत्पतिः ८२ मोहनीमोहनामायीमह
मायीमहामखी वृषोवृषाकपिःकालःकालीदमनकारकः ८३ कुब्जा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

महोदधिः ॥१००॥ समुद्रोऽब्धिरकूपारः पारावारस्सरित्पतिः ॥ गोकुलानन्द
कारी च प्रतिज्ञापरिपालकः ॥१०१॥ सदारामः कृपारामो महारामो धनुर्द्धरः
पर्वतः पर्वताकारो गयो गेयो द्विजप्रियः ॥१०२॥ कमलाश्वतरो रामो रामाय
णप्रवर्तकः ॥ द्यौर्दिवो दिवसो दिव्यो भव्यो भावी भयापहः ॥१०३॥ पार्वती भा
ग्यसहितो भ्राता लक्ष्मीविलासवान् ॥ विलासी साहसी सर्वी गर्वी गर्वित
लोचनः ॥१०४॥ मुरारिर्लोकधर्मज्ञो [illegible] जीवनो पवनान्तकः ॥ य
मो यमारिर्यमनो यामी यामविधायकः ॥१०५॥ वंशुली पांशुली पांशुपा
ण्डुरर्जुनवल्लभः ॥ ललिता चन्द्रिकामाली माली मालाम्बुजाश्रयः
॥१०६॥ अम्बुजाक्षो महायज्ञो दक्षो चिन्तामणिप्रभुः ॥ मणिर्दिनमणि
श्चैव केदारो बदरीश्रयः ॥१०७॥ बदरीवनसंप्रीतो व्यासः सत्यवतीसुतः
अमरारिनिहन्ता च सुधासिन्धुर्विधूदयः ॥१०८॥ चन्द्रो रविः शिवः शूली

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कुष्ठविनाशनः रुक्मिणीहरणाप्रेमाप्रेमी चन्द्रावलीपतिः ८२ श्री
कर्त्ता विश्वभर्त्ता च नारायणवनौवली गणोगणपतिश्चैव दत्तात्रेयो
मणः मुनिः ८३ व्यासो नारायणो दिव्यो भव्यो भावुकधारकः स्वःश्रेयः
श्रेयदिवं भद्रं भावुकं भविकं शुभम् ८४ शुभात्मकः शुभः शास्ता प्रश
स्तासेघनादहा ब्रह्मण्यदेवो दीनानामुद्धारकरणक्षमः ८५ कृ
ष्णः कमलपत्राक्षः कृष्णः कमललोचनः कृष्णः कामी सदाकृष्णः स
मस्तप्रियकारकः ८६ नन्दो नन्दी महानादी मादी मादानकः कि
ली मिली हिली गिली गोली गोलो गोलालयोऽजी ८७ गुग्
ली मारकी शाखी वटः पिप्पलकः कृती म्लेच्छहा कालहर्त्ता
चयशोदायशस्वच ८८ अच्युतः केशवो विष्णुर्हरिः सत्यो जनार्द
नः हंसो नारायणो लीलो नीलो भक्तिपरायणः ८९ जानकीव
ल्लभो रामो विरामो विघ्ननाशनः सहदेवभानुर्महाभानुर्वीरभानु

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

पालस
हस्रनाम

हृषीकेशः पीतवासा वसुदेवप्रियात्मजः ॥ ११७ ॥ नन्दगोपकुमारार्यो नवनी
नीताशनो विभुः ॥ पुराणपुरुषः श्रेष्ठः शंखपाणिः सुविक्रमः ॥ ११८ ॥
अनिरुद्धश्चक्ररथः शार्ङ्गपाणिश्चतुर्भुजः ॥ गदाधरः सुरार्तिघ्नो गोवि
न्दो नन्दकायुधः ॥ ११९ ॥ वृन्दावनचरः शौरिर्वेणुवाद्यविशारदः ॥ तृणा
वर्त्तान्तको भीमसाहसो बहुविक्रमः ॥ १२० ॥ शकटासुरसंहारी बका
सुरविनाशनः ॥ धेनुकासुरसंघातः पूतनारिर्नृकेसरी ॥ १२१ ॥ पिता
महो गुरुः साक्षी प्रत्यगात्मा सदाशिवः ॥ अप्रमेयः प्रभुः प्राज्ञः प्रतर्क्य
स्वप्नवर्द्धनः ॥ १२२ ॥ धन्यो मान्यो भवो भावो धीरः शान्तो जगद्गुरुः ॥
अंतर्यामीश्वरो दिव्यो दैवज्ञो देवसंस्तुतः ॥ १२३ ॥ क्षीराब्धिशयनो धाता
लक्ष्मीवाँल्लक्ष्मणाग्रजः ॥ धात्रीपतिरमेयात्मा चन्द्रशेखरपूजि
तः ॥ १२४ ॥ लोकसाक्षी जगच्चक्षुः पुण्यचारित्रकीर्तनः ॥ कोटिमन्मथ

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

चक्री चैव गदाधरः ॥ श्रीकर्त्ता श्रीपतिः श्रीदः श्रीदेवो देवकीसुतः ॥ १०९
श्रीपतिः पुण्डरीकाक्षः पद्मनाभो जगत्पतिः ॥ वासुदेवोऽप्रमेयात्मा केश
वो गरुडध्वजः ॥ ११० ॥ नारायणः परं धाम देवदेवो महेश्वरः ॥ चक्रपाणिः
कलापूर्णो वेदवेद्यो दयानिधिः ॥ १११ ॥ भगवान्सर्वभूतेशो गोपालः सर्व
पालकः ॥ आनन्दो निर्गुणोऽनन्तो निर्विकल्पो निरञ्जनः ॥ ११२ ॥ निरा
धारो निराकारो निराभासो निराश्रयः ॥ पुरुषः प्रणवातीतो मुकुन्दः प
रमेश्वरः ॥ ११३ ॥ क्षणावनिः सार्वभौमो वैकुण्ठो भक्तवत्सलः ॥ विष्णु
र्दामोदरः कृष्णो माधवो मथुरापतिः ॥ ११४ ॥ देवकीगर्भसंभूतो यशो
दावत्सलो हरिः ॥ शिवः संकर्षणः शंभुर्भूतनाथो दिवस्पतिः ॥ ११५
अव्ययः सर्वधर्मज्ञो निर्मलो निरुपद्रवः ॥ निर्वाणनायको नित्यो
नीलजीमूतसन्निभः ॥ ११६ ॥ कलाक्षयश्च सर्वज्ञः कमलारूपतत्परः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

श्रापहारकः। १३३॥ शङ्खोरमूर्त्तिः श्रीधाना नारकोमूलकारणम्। सृष्टि
संरक्षणोपायः क्रूरासुरविभञ्जनः। १३४॥ नरकासुरसंहारी मुरारिर्वै
रिमर्द्दनः। आदितेयप्रियो दैत्यभीकरोऽपशेखरः। १३५। जरासन्धकु
लध्वंसी कंसारातिः सुविक्रमः। पुण्यश्लोककीर्त्तनीयो यादवेन्द्रो
जगन्नुतः। १३६। रुक्मिणीरमणः सत्यभामाजाम्बवतीप्रियः। मि
१० त्रविन्दानाग्नजितीलक्ष्मणासमुपासितः। १३७। सुधाकरकुले
जातोऽनंतः प्रबलविक्रमः। सर्वसौभाग्यसंपन्नो द्वारकापत्तनस्थि ॥१०
तः। १३८। भद्रासूर्य्यसुतानाथो लीलामानुषविग्रहः। सहस्रषोड
शस्त्रीभोगमो नैकदायकः। १३९। वेदान्तवेद्यः संवेद्यो वैद्यो ब्रह्मा
ण्डनायकः। गोवर्द्धनधरो नाथः सर्वजीवदयापरः। १४०। मूर्त्ति
मान्सर्वभूतात्मा आर्त्तत्राणपरायणः। सर्वज्ञः सर्वसुलभः स
र्वशास्त्रविशारदः। १४१। षड्गुणैश्वर्य्यसंपन्नः पूर्णकामो धुरंधरः।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सौन्दर्य्यो जगन्मोहनविग्रहः ।१२५। मन्दस्मिततनुर्गोपो गोपिकापरिवेष्टि
तः फुल्लारविन्दनयनश्चाणूरान्ध्रनिषूदनः ।१२६। इन्दीवरदलश्या
मो बर्हिबर्हावतंसकः । मुरलीनिनदाह्लादो दिव्यमालाम्बरावृतः
।१२७। सुकपोलयुगः सुभ्रूयुगलः सुललाटकः । कम्बुग्रीवो विशाला
क्षो लक्ष्मीवान् शुभलक्षणः ।१२८। पीनवक्षाश्चतुर्बाहुश्चतुर्मूर्ति
स्त्रिविक्रमः । कलंकरहितः शुद्धो दुष्टशत्रुनिबर्हणः ।१२९। किरीटकु
ण्डलधरः कटकांगदमण्डितः । मुद्रिकाभरणोपेतः कटिसूत्रविराजि
तः ।१३०। मंजीररंजितपदः सर्वाभरणभूषितः । विन्यस्तपादयुग
लो दिव्यमंगलविग्रहः ।१३१। गोपिकानयनानन्दः पूर्णचन्द्रनि
भाननः । समस्तजगदानन्दः सुन्दरो लोकनन्दनः ।१३२। यमुना
तीरसंचारी राधामन्मथवैभवः । गोपनारीप्रियो दान्तो गोपीव

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

उपेन्द्र इन्द्रावरजो वामनो बलिबन्धनः गजेन्द्रवरदः स्वामी सर्वदेवनम
स्कृतः ५० शेषपर्यंकशयनो वैनतेयरथो जयी अव्याहतबलैश्व
र्यस्संपन्नः पूर्णमानसः ५१ योगेश्वरेश्वरः साक्षी क्षेत्रज्ञो ज्ञानदाय
कः योगिहृत्पंकजावासो योगमायासमन्वितः १५२ नादबिन्दुकला
तीतश्चतुर्वर्गफलप्रदः सुषुम्नामार्गसंचारी देहस्यांतरसंस्थि
११ तः १५३ देहेन्द्रियमनःप्राणसाक्षी चेतःप्रसादकः सूक्ष्मः सर्वगतो
देही ज्ञानदर्पणगोचरः १५४ तत्वत्रयात्मकोऽव्यक्तः कुण्डलीसमु ११
पाश्रितः ब्रह्मण्यः सर्वधर्मज्ञः शान्तो दान्तो गतक्लमः १५५ श्री
निवासः सदानन्दी विश्वमूर्तिर्महाप्रभुः सहस्रशीर्षा पुरुषः स
हस्राक्षः सहस्रपात् १५६ समस्तभुवनाधारः समस्तप्राणरक्षकः
समस्तसर्वभावज्ञो गोपिकाप्राणवल्लभः १५७ नित्योत्सवो नित्य

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

महानुभावः कैवल्यो व्यापको लोकनायकः ॥ १४२ आदिमध्यान्तरहि
तः शुद्धसात्विकविग्रहः असमानस्समस्तात्मा शरणागतवत्सलः
१४३ उत्पत्तिस्थितिसंहारकारणं सर्वकारणम् ॥ गम्भीरस्सर्व
भावज्ञः सच्चिदानन्दविग्रहः ॥ १४४ विष्वक्सेनः सत्यसन्ध
स्सत्यवाक् सत्यविक्रमः सत्यव्रतस्सत्यसंज्ञस्सत्यधर्मपराय
णः ॥ १४५ आपन्नार्तिप्रशमनो द्रौपदीमानरक्षकः कन्दर्प
जनकः प्राज्ञो जगन्नाटकवैभवः ॥ १४६ भक्तवश्यो गुणातीतः
सर्वैश्वर्यप्रदायकः दमघोषसुतद्वेषी बाणबाहुविखण्डनः
१४७ भीष्मभक्तिप्रदो दिव्यः कौरवान्वयनाशनः कौन्तेयप्रि
यबन्धुश्च पार्थस्यन्दनसारथिः ॥ १४८ नारसिंहो महावीरः स्त
म्भजातो महाबलः प्रह्लादवरदस्सत्यो देवपूज्योऽभयङ्करः ॥ १४९

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कौरवान्वयनाशनः १००

सिन्धुर्भगवान्भक्तानन्दपरः ॥ ७ ॥ इति श्रीराधिकानामसहस्रनाम
कीर्तितम् १६६ स्मरणात्पापराशीनां खण्डनं मृत्युनाशनम् ॥ वै
ष्णवानां प्रियकरं महारोगनिवारणम् १६७ ब्रह्महत्यासुरापाने पर
स्त्रीगमनं तथा परद्रव्यापहरणं परद्वेषसमन्वितम् १६८ मानसं
वाचिकं कायं यत्पापं पापसंभवम् ॥ सहस्रनामपठनात्सर्वे नश्यन्ति
१२ तत्क्षणात् ॥ १६९ महादरिद्रयुक्तो यो वैष्णवो विष्णुभक्तिमान् ॥ का १२
र्तिक्यां यः पठेद्रात्रौ शतमष्टोत्तरं क्रमात् ॥ १७० पीताम्बरधरो धी
मान् सुगन्धिपुष्पचन्दनैः ॥ पुस्तकं पूजयित्वा च नैवेद्यादिभिरे
व च ॥ १७१ राधाध्यानांकितो धीरो वनमालाविभूषितः शतम
ष्टोत्तरं देवि पठेन्नामसहस्रकम् १७२ चैत्रशुक्ले च कृष्णे च कुहू
संक्रान्तिवासरे ॥ पठितव्यं प्रयत्नेन त्रैलोक्यं मोहयेत् क्षणात् १७३

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सोरव्यो नित्यश्रीर्नित्यमंगलः सूर्याश्रितो जगन्नाथः श्रीवैकुण्ठपुराधि-
पः १५८ पूर्णानन्दघनीभूतोगोपवेषधरोहरिः कलापकुसुमःश्यामः
कोमलःशान्तविग्रहः १५९ गोपाङ्गनावृतोऽनन्तोवृन्दावनस-
माश्रयः वेणुवादरतःश्रेष्ठोदेवानांहितकारकः १६० बालक्रीडास-
मायुक्तो नवनीतस्यतस्करः गोपालकामिनीराजचौरजारशिखा-
मणिः १६१ परंज्योतिः पराकाशःपरावारःपरिस्फुटः अष्टादशा-
क्षरोमंत्रोव्यापकोलोकपावनः १६२ सप्तकोटिमहामंत्रशेखरो
देवशेखरः विज्ञानज्ञानसंधानस्तेजोराशिर्जगत्पतिः १६३
भक्तलोकप्रसन्नात्मा भक्तमन्दारविग्रहः भक्तदारिद्र्यदमनो भ-
क्तानांप्रीतिदायकः १६४ भक्ताधीनमनःपूज्यो भक्तलोकशिवङ्क-
रः भक्ताभीष्टप्रदस्सर्वभक्ताघौघनिकृन्तनः १६५ अपारकरुणा-

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कृते नोक्तं राधिकायै मपि प्रोक्तं पुराशिवे। नारदाय मया प्रोक्तं नारदेन प्रका
शितम् १८२ मयालयि वरारोहे प्रोक्तमेतत्सुदुर्लभम्। गोपनीयं प्र
यत्नेन प्रकाश्यं न कदाचन ॥१८३॥ शठाय पापिने चैव लंपटाय विशेषतः
न दातव्यं न दातव्यं न दातव्यं कदाचन ॥१८४॥ देयं शान्ताय शिष्याय विष्णु
१३ भक्तिरताय च। गोदानं ग्रहणे स्नानं वाजपेय शतं तथा ॥१८५॥ अश्व
मेधसहस्रस्य फलं पाठे भवेद्ध्रुवम्। मोहनं स्तम्भनं चैव मारणोच्चाट
नादिकम् ॥१८६॥ यः पठेच्छ्रुणुयाद्वापि तत्तत्प्राप्नोति वैष्णवः। एका १३
दश्यां नरः स्नात्वा सुगन्धिद्रव्यतैलकैः ॥१८७॥ आहारं ब्राह्मणे दत्वा
दक्षिणां स्वर्णभूषणाम्। ततः आरम्भकर्त्ता सर्वं प्राप्नोति मान
वः ॥१८८॥ शतावर्त्तं सहस्रं वा यः पठेद्भक्तिसंयुतः। श्रीवृन्दावनचन्द्र
स्य प्रसादात्सर्वमाप्नुयात् ॥१८९॥ यः पठेत्पुस्तकं देवि पूजितं चैव ति

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तुलशीमालयायुक्तो वैसर्गेभक्तितत्परः ॥ रविवारे च शुक्रे चै द्वादश्यां
श्राद्धवासरे ॥ १७४ ॥ ब्राह्मणापूजयित्वा च भोजयित्वा च यत्नतः पठे
न्नामसहस्रंच ततः सिद्धिः प्रजायते ॥ १७५ ॥ महानिशायां सततं वै
स्रवो यः पठेत्सदा ॥ देशांतरगता लक्ष्मीः समायाति न संशयः ॥ १७६
त्रैलोक्ये च महादेव्यस्तु न्दर्प्यः काममोहिताः ॥ मुग्धाः स्वयमाया
न्ति वैभवं च भजन्ति ताः ॥ १७७ ॥ रोगी रोगात्प्रमुच्येत बद्धो मुच्येत
बन्धनात् ॥ गुर्विणी जनयेत्पुत्रं कन्या विन्दति सत्पतिम् ॥ १७८ ॥ रा
जा च वश्यतां याति किं पुनः क्षुद्रमानुषाः ॥ सहस्रनाम श्रवणात्पु
ठनात्पूजनात्प्रिये ॥ १७९ ॥ धारणात्सर्वमाप्नोति वैसवो नात्र संश
यः ॥ वंशीवटे चान्यवटेष्वथ पिप्पलकेऽपि वा कदम्बपादपतले गोपाल
मूर्तिसन्निधौ ॥ यः पठेद्वै भवेन्नित्यं स याति हरिमन्दिरम् ॥ १८० ॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ष्ठति ॥ नमारी न च दुर्भिक्षं नोपसर्गभयं क्वचित् ॥ १९० ॥ सर्पा
दिभूतयक्षाद्या नश्यन्ति नात्र संशयः ॥ श्रीगोपालो महादेवि
वसेत्तस्य गृहे सदा ॥ १९१ ॥ यद्गेहे सहस्रं च नाम्नां तिष्ठ
ति पूजितम् ॥ तस्य किं दुर्लभं लोके कामधुग्यत्र केश
१४ वः ॥ १९२ ॥ ॐ ॥ इति श्रीसंमोहनतंत्रे पार्वतीश्वर १४
संवादे श्रीगोपालसहस्रनामस्तोत्रं संपूर्णम् ॥ शु
14 भमस्तु शुभं भूयात् ॥ पुस्तकमिदं मालो द्विज
गन्नाथेन धार्मिकाय ॥ ब्रह्मनाम्ने प्रस्तुतं दत्तं ॥ २

15

॥ गोपालसहस्रनाम ॥
॥ ॥ समाप्तम् ॥ ॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham